*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[19]**

1. कवि सुन्दरसुरभाषां केन पदेन सम्बोधयति?

(A) पितः (B) मातः (C) भ्रातः (D) दातः

**उत्तर :** (B) मातः

2. सुन्दरसुरभाषायां किं नास्ति?

(A) शास्त्रज्ञानम् (B) संस्कृतिः (C) वेदान्तचिन्तनम् (D) अशुद्धिः

**उत्तर :** (D) अशुद्धिः

3. "मञ्जुलमञ्जूषा...." इत्यत्र 'मञ्जूषा' शब्दस्य कोऽर्थः?

(A) माता (B) रमणीया (C) मानवीया (D) पेटिका

**उत्तर :** (D) पेटिका

4. "मञ्जुलमञ्जूषा" इत्यस्य अर्थः कः?

(A) कठोरभाषा (B) शोचनीया भाषा (C) मनोहररूपेण संकलिता (D) सामान्यभाषा

**उत्तर :** (C) मनोहररूपेण संकलिता

5. 'मञ्जुलमञ्जूषा सुन्दरसुरभाषा' इति पाठस्य क्रमः कः?

(A) सप्तमः (B) पञ्चमः (C) चतुर्थः (D) अष्टमः

**उत्तर:** (A) सप्तमः

6. 'संस्कृतदिवसः' कस्मिन् मासे भवति?

(A) भाद्रपदमासे (B) ज्येष्ठमासे (C) श्रावणमासे (D) अश्विनमासे

**उत्तर :** (C) श्रावणमासे

7. संस्कृतभाषा कुत्र विजयते?

(A) आकाशे (B) देवालये (C) जलाशये (D) धरायां

**उत्तर :** (D) धरायां

8. संस्कृतभाषायाः विकासं के कृतवन्तः?

(A) देवाः (B) मुनयः (C) दानवाः (D) बालकाः

**उत्तर :** (B) मुनयः

9. संस्कृते कति रसाः सन्ति?

(A) षट् (B) नव (C) सप्त (D) पञ्च

**उत्तर :** (B) नव

10. सुन्दरसुरभाषा कुत्र विजयते?

(A) आकाशे (B) जलधौ (C) धरायाम् (D) पवने

**उत्तर :** (C) धरायाम्

11. सुन्दरसुरभाषा केषां जीवनस्य आशा उच्यते?

(A) केवलं कवीनाम्
(B) बालकानाम्
(C) पौराणिक-सामान्यजनानाम्
(D) छात्राणाम्

**उत्तर :** (C) पौराणिक-सामान्यजनानाम्

12. 'व्योमशास्त्रम्' इत्यस्य कोऽर्थः?

(A) अन्तरिक्षशास्त्रम्
(B) चिकित्साशास्त्रम्
(C) साहित्यशास्त्रम्
(D) शिल्पशास्त्रम्

**उत्तर:** (A) अन्तरिक्षशास्त्रम्

13. श्रुतिसुखनिन्दे!

(A) संस्कृतभाषायाः ध्वनिश्रवणेन सुखं वर्धते।
(B) संस्कृतभाषायाः ध्वनिश्रवणेन सुखं नश्यति।
(C) संस्कृतभाषायाः ध्वनिश्रवणेन कष्टं भवति।

**उत्तर:** (A) संस्कृतभाषायाः ध्वनिश्रवणेन सुखं वर्धते।

14. संस्कृतभाषायाः ध्वनिश्रवणेन किं वर्धते?

(A) वैराग्यम्
(B) दुःखम्
(C) सुखम्
(D) मित्रता

**उत्तर :** (C) सुखम्

15. 'काव्यवशारदे' अत्र 'विशारदे' इति पदस्य कोऽर्थः?

(A) विशुद्धे
(B) विचारिते
(C) विगलिते
(D) पारङ्गते

**उत्तर :** (D) पारङ्गते

16. मञ्जुलमञ्जूषा संस्कृतभाषा।

(A) संस्कृतभाषा देवस्वरूपा अस्ति।
(B) संस्कृतभाषा कोमलपदावल्या परिपूर्णा ज्ञानपेटिका अस्ति।
(C) संस्कृतभाषा काठिन्ययुक्ता काष्ठपेटिका अस्ति।

**उत्तर :** (B) संस्कृतभाषा कोमलपदावल्या परिपूर्णा ज्ञानपेटिका अस्ति।

17. मम वचनातीता सुन्दरसुरभाषा।

(A) संस्कृतभाषायाः गौरवं मम वर्णनातीतम् अस्ति।
(B) संस्कृतभाषायाः गौरवं मम वर्णनानुवूकलम् अस्ति।
(C) संस्कृतभाषायाः गौरवम् अवर्णनीयम् अस्ति।

**उत्तर:** (A) संस्कृतभाषायाः गौरवं मम वर्णनातीतम् अस्ति।

18. संस्कृतभाषा कस्य आशा अस्ति?

(A) धनस्य
(B) जीवनस्य
(C) बलस्य
(D) देशस्य

**उत्तर :** (B) जीवनस्य

19. सुन्दरसुरभाषा।

(A) संस्कृतभाषा केवलं सुराणांभाषा अस्ति।
(B) संस्कृतभाषा सुललिता जनभाषा अस्ति।

(C) संस्कृतभाषा अतीव सुन्दरभाषा देवभाषा च अस्ति।

**उत्तर :** (C) संस्कृतभाषा अतीव सुन्दरभाषा देवभाषा च अस्ति।

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा।** **[13]**

20. अयि मातः तव पोषणक्षमता ____________ वचनातीता। (कालिदासबाणादि / मम)

**उत्तर :** मम

21. गति-मति-प्रेरक-काव्य-विशारदे, तव ____________ एषा सुन्दरसुरभाषा। (कालिदासबाणादि / संस्कृतिः)

**उत्तर :** संस्कृतिः

22. नवरस-रुचिरालङ्कृतिधारा ____________ -वेदान्तविचारा। (वेदविषय / आशा)

**उत्तर :** वेदविषय

23. पौराणिक-सामान्य-जनानां जीवनस्य ____________ । (सकलप्रमोदे / मम)

**उत्तर :** आशा

24. वेदव्यास-वाल्मीकि-मुनीनां ____________ कवीनाम्। (वेदविषय / संस्कृतिः)

**उत्तर :** कालिदासबाणादि

25. वैद्य-व्योम-शास्त्रादि-विहारा ____________ , सुन्दरसुरभाषा। (मम / सकलप्रमोदे)

**उत्तर :** विजयते

26. श्रुतिसुखनिनदे ____________ स्मृतिहितवरदे सरसविनोदे। (आशा / विजयते)

**उत्तर :** सकलप्रमोदे

27. वेदविषय ____________ विचारा। (वेदान्त / दुर्दान्त)

**उत्तर :** वेदान्त

28. जीवनस्य ____________ सुन्दरसुरभाषा। (आशा / निराशा)

**उत्तर :** आशा

29. तव ____________ एषा सुन्दरसुरभाषा। (संस्कृतिः / प्रकृतिः)

**उत्तर :** संस्कृतिः

30. ____________ धरायाम्, सुन्दरसुरभाषा। (विजयते / पलायते))

**उत्तर :** विजयते

31. ____________ वचनातीता सुन्दरसुरभाषा। (मम / तव)

**उत्तर :** मम

32. श्रुतिसुख ____________ । (प्रमोदे / निनदे)

**उत्तर :** निनदे

*** स्तम्भयोः मेलनं कुरुत।** **[16]**

| **क वर्गः** | **ख वर्गः** |
|---|---|
| 33. अयि मातस्तव पोषणक्षमता | (i) स्मृतिहितवरदे सरसविनोदे |

| | |
|---|---|
| 34. वेदव्यास-वाल्मीकि मुनीनां | (ii) मम वचनातीता, सुन्दरसुरभाषा |
| 35. पौराणिक-सामान्यजनानाम् | (iii) कालिदासबाणादिकवीनाम् |
| 36. श्रुतिसुखनिनदे सकलप्रमोदे | (iv) जीवनस्य आशा, सुन्दरसुरभाषा |

**उत्तर :**

| क वर्गः | ख वर्गः |
|---|---|
| 1. अयि मातस्तव पोषणक्षमता | (ii) मम वचनातीता, सुन्दरसुरभाषा |
| 2. वेदव्यास-वाल्मीकि मुनीनां | (iii) कालिदासबाणादिकवीनाम् |
| 3. पौराणिक-सामान्यजनानाम् | (iv) जीवनस्य आशा, सुन्दरसुरभाषा |
| 4. श्रुतिसुखनिनदे सकलप्रमोदे | (i) स्मृतिहितवरदे सरसविनोदे |

| शब्दाः | अर्थाः |
|---|---|
| 37. विकसिता | (क) ध्वनिदात्रि ! |
| 38. वचनातीता | (ख) विस्तारिता |
| 39. निनदे ! | (ग) आनन्दमयि ! |
| 40. प्रमोदे ! | (घ) वर्णनातीता |

**उत्तर :** (1 - ख, 2 - घ, 3 - क, 4 - ग)

| शब्दाः | अर्थाः |
|---|---|
| 41. विलसिता | (क) पेटिका |
| 42. मञ्जुला | (ख) रञ्जिता |
| 43. मञ्जूषा | (ग) पृथिव्याम् |
| 44. धरायाम् | (घ) मनोहरा |

**उत्तर :** (1 - ख, 2 - घ, 3 - क, 4 - ग)

| खण्ड 'अ' | खण्ड 'ब' |
|---|---|
| 45. श्रुतिसुखनिनदे | (i) काव्यविशारदे |
| 46. स्मृतिहितवरदे | (ii) सकलप्रमोदे |
| 47. गति-मति-प्रेरक | (iii) सुन्दरसुरभाषा |
| 48. तव संस्कृतिरेषा | (iv) सरसविनोदे |

**उत्तर :** (1 - ii, 2 - iv, 3 - i, 4 - iii)

*** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत। [5]**

49. कस्याः ध्वनिश्रवणेण सुखं वर्धते?

**उत्तर :** संस्कृतभाषायाः

50. संस्कृतभाषा कस्य आशा?

**उत्तर :** जीवनस्य

51. संस्कृतभाषा कुत्र विजयते?

**उत्तर :** धरायाम्

52. संस्कृते कति रसाः सन्ति?

**उत्तर :** नव-रसाः

53. सुन्दरसुरभाषा कस्य वचनातीता?

**उत्तर :** मम

*** पूर्णवाक्येन उत्तरं लिखत। [10]**

54. केषां विचाराः जनान् अभिप्रेरयन्ति?

**उत्तर :** वेद-वेदान्तादिनां विचाराः जनान् अभिप्रेरयन्ति।

55. कैः रसैः समृद्धा साहित्यपरम्परा विराजते?

**उत्तर :** नवरसैः समृद्धा साहित्यपरम्परा विराजते।

56. संस्कृतभाषा केषां जीवनस्य आशा अस्ति?

**उत्तर :** संस्कृतभाषा वेदव्यास-वाल्मीकि-मुनीनां कालिदास-बाणादिकवीनां पौराणिक-सामान्यजनानां जीवनस्य आशा अस्ति।

57. संस्कृतभाषा केषु शास्त्रेषु विहरति?

**उत्तर :** संस्कृतभाषा वैद्य-व्योमादिशास्त्रेषु विहरति।

58. संस्कृतभाषायाः कानि कानि सम्बोधनपदानि अत्र प्रयुक्तानि?

**उत्तर :** संस्कृतभाषायाः मातः!, श्रुतिसुखनिन्दे!, सकलप्रमोदे!, स्मृतिहितवरदे! सरसविनोदे!, गति-मति-प्रेरक-काव्यविशारदे! इत्यादिमि सम्बोधनपदानि अत्र प्रयुक्तानि।

*** रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत। [14]**

59. संस्कृतकाव्यशास्त्रेषु <u>नवसंख्यकाः</u> रुचिराः रसाः सन्ति।

**उत्तर :** संस्कृतकाव्यशास्त्रेषु **कति** रुचिराः रसाः सन्ति?

60. संस्कृतभाषा <u>विविधभाषाः</u> परिपोषयति।

**उत्तर :** संस्कृतभाषा **काः** परिपोषयति?

61. सामान्यजनानां जीवनं <u>काव्यैः</u> प्रभावितम् अस्ति।

**उत्तर :** सामान्यजनानां जीवनं **कैः** प्रभावितम् अस्ति?

62. कवयः अपि <u>उपादेयानि</u> काव्यानि रचितवन्तः।

**उत्तर :** कवयः अपि **कीदृशानि** काव्यानि रचितवन्तः?

63. मुनिगणाः संस्कृतभाषायाः विकासं कृतवन्तः।

**उत्तर :** मुनिगणाः **कस्याः** विकासं कृतवन्तः?

64. संस्कृतभाषा पृथिव्यां विहरति।

**उत्तर :** संस्कृतभाषा **कुत्र** विहरति?

65. संस्कृतभाषायाः ध्वनिश्रवणेन सुखं वर्धते।

**उत्तर : कस्याः** ध्वनिश्रवणेन सुखं वर्धते?

66. एषा सामान्यजनानां जीवनस्य आशा अस्ति।

**उत्तर :** एषा **केषां** जीवनस्य आशा अस्ति?

67. बहवः कवयः अस्याः सौन्दर्य वर्धितवन्तः।

**उत्तर :** बहवः कवयः अस्याः **किं** वर्धितवन्तः?

68. वेद-वेदाङ्गादीनि गभीराणि शास्त्राणि सन्ति।

**उत्तर :** वेद-वेदाङ्गादीनि गभीराणि **कानि** सन्ति?

69. संस्कृतभाषायाः गौरवं वर्णनातीतम् अस्ति।

**उत्तर :** संस्कृतभाषायाः गौरवं **कीदृशम्** अस्ति?

70. मुनयः संस्कृतभाषायाः विकासं कृतवन्तः।

**उत्तर : के** संस्कृतभाषायाः विकासं कृतवन्तः?

71. संस्कृतभाषा धारायां विजयते।

**उत्तर :** संस्कृतभाषा **कुत्र** विजयते?

72. संस्कृतभाषा सुन्दरसुरभाषा देवभाषा च अस्ति।

**उत्तर : का** सुन्दरसुरभाषा देवभाषा च अस्ति?

*** अधोलिखितशब्दानाम् अर्थान् विलिख्य वाक्येषु प्रयोगं कुरुत। [4]**

73. मञ्जूषा - ______

**उत्तर :** मञ्जूषा - पेटी।
वाक्य - चौरः धनस्यमञ्जूषाम् आदाय पलायितः।

74. वचनातीत - ______

**उत्तर :** वचनातीत - वाणी से परे।
वाक्य - अस्याः पोषणक्षमता ममवचनातीता अस्ति।

75. धरायाम् - ______

**उत्तर :** धरायाम् - धरती पर।
वाक्य - अस्य प्रभावंधरायां सर्वत्र दृश्यते।

76. मञ्जुला - ______

**उत्तर :** मञ्जुला - मन को हरने वाली।
वाक्य - अस्याः वाणीमञ्जुला अस्ति।

*** समुचितपदेन रिक्तस्थानानि पूरयत्, येन कथनानां भावः स्पष्टः स्यात्।** **[21]**

77. वेदव्यास-वाल्मीकि __________ सुन्दरसुरभाषा॥
अन्वयः—(त्वं) वेदव्यास वाल्मीकि मुनीनां __________ बाणादिकवीनां__________ सामान्यजनानां __________ आशा (असि)। त्वं सुन्दरसुरभाषा (असि)।
[मञ्जूषा - पौराणिक, जीवनस्य, कालिदास]

**उत्तर :** (त्वं) वेदव्यास-वाल्मीकि मुनीनां कालिदास-बाणादिकवीनां पौराणिक-सामान्यजनानां जीवनस्य आशा (असि)। त्वं सुन्दरसुरभाषा (असि)।

78. नवरस-रुचिरालङ्कृति-धारा।
भावार्थः—संस्कृतकाव्यशास्त्रेषु __________ रुचिराः रसाः सन्ति। शब्दार्थपूर्णाः __________ अलङ्काराः __________।
[मञ्जूषा - विविधाः, नवसंख्याकाः, शोभन्ते]

**उत्तर :** संस्कृतकाव्यशास्त्रेषु नवसंख्याकाः रुचिराः रसाः सन्ति। शब्दार्थपूर्णाः विविधाः अलङ्काराः शोभन्ते।

79. मुनिवरविकसितकविवरविलसित-संस्कृतभाषा।
भावार्थः - मुनयः अस्याः संस्कृत भाषायाः __________ कृतवन्तः । बहव __________ काव्यरचनया अस्याः __________ वर्धितवन्तः ।
[मञ्जूषा - कवयः, सौन्दर्य, विकासं]

**उत्तर :** मुनयः अस्याः संस्कृत-भाषायाः विकासं कृतवन्तः। बहवः कवयः काव्यरचनया अस्याः सौन्दर्यं वर्धितवन्तः।

80. पौराणिक-सामान्य-जनानां जीवनस्य आशा।
भावार्थः - प्राचीन कालाद् आरभ्य __________ यावत् सामान्यजनानां __________ संस्कृतभाषया रचितैः __________ प्रभावितम् अस्ति। संस्कृतभाषा बहूनां लक्ष्याणां प्राप्तिका अस्ति।
[मञ्जूषा - जीवनं, काव्यैः, इदानीं]

**उत्तर :** प्राचीन-कालाद् आरभ्य इदानीं यावत् सामान्यजनानां जीवनं संस्कृतभाषया रचितैः काव्यैः प्रभावितम् अस्ति। संस्कृतभाषा बहूनां लक्ष्याणां प्राप्तिका अस्ति।

81. श्रुतिसुखनिन्दे __________ सुन्दरसुरभाषा॥
अन्वयः—हे ! श्रुतिसुखनिन्दे ! __________ ! स्मृतिहितवरदे ! __________ ! गति-मति-प्रेरक __________ ! तव एषा संस्कृतिः (अस्ति)। (त्वं) सुन्दरसुरभाषा (असि)।
[मञ्जूषा - काव्यवशारदे!, सकलप्रमोदे!, सरसविनोदे]

**उत्तर :** हे! श्रुतिसुखनिन्दे! सकलप्रमोदे! स्मृतिहितवरदे! सरसविनोदे! गति-मति-प्रेरक-काव्यवशारदे! तव एषा संस्कृतिः (अस्ति)। (त्वं) सुन्दरसुरभाषा (असि)।

82. नवरस-रुचिरा __________ सुन्दरसुरभाषा॥
अन्वयः—नवरस-रुचिरा __________ वेदविषय __________ वैद्य-व्योम __________ विहारा धरायां सुन्दरसुरभाषा विजयते।
[मञ्जूषा - शास्त्रादि, अलङ्कृतिधारा, वेदान्तविचारा]

**उत्तर :** नवरस-रुचिरा अलङ्कृतिधारा वेदविषय-वेदान्तविचारा वैद्य-व्योम-शास्त्रादिविहारा धरायां सुन्दरसुरभाषा विजयते।

83. मुनिवरविकसित ____________ सुन्दरसुरभाषा॥
अन्वयः—(त्वं) मुनिवर ____________ कविवर ____________ मञ्जुल सुन्दरसुरभाषा (असि)। अयि मातः! तव ____________ मम वचनातीता अस्ति।
[मञ्जूषा - विकसित, पोषणक्षमता, विलसित]

**उत्तर :** अन्वयः—(त्वं) मुनिवर-विकसित-कविवर विलसित-मञ्जुलमञ्जूषा सुन्दरसुरभाषा (असि)। अयि मातः! तव पोषणक्षमता मम वचनातीता अस्ति।

*** अधोलिखित पद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[28]**

84. श्रुतिसुखनिनदे सकलप्रमोदे
स्मृतिहितवरदे सरसविनोदे।
गति-मति-प्रेरक-काव्यविशारदे
तव संस्कृतिरेषा, सुन्दरसुरभाषा ॥
I. एकपदेन उत्तरत –
(i) सकलप्रमोदा का?
(ii) संस्कृतभाषा कीदृशी वरदा अस्ति?
II. पूर्णवाक्येन उत्तरत –
(i) केन सुखं वर्धते?
(ii) कस्याः एषा संस्कृतिः अस्ति?
III. निर्देशानुसार उत्तरत –
(i) 'एषा' इति सर्वनामपदस्य विशेष्यपदं पद्यांशे किं प्रयुक्तम्?
(अ) सुरभाषा (ब) विनोदे (स) संस्कृतिः (द) विशारदे
(ii) 'नीरसा' इति पदस्य पद्यांशे विलोमपदं किम् अस्ति?
(अ) सकला (ब) सरसा (स) सुखदा (द) प्रेरिका
(iii) 'बुद्धिः' इत्यर्थे पद्यांशे किं पदं प्रयुक्तम्?
(अ) गतिः (ब) निनदे (स) विशारदे (द) मतिः

**उत्तर :** I. (i) संस्कृतभाषा
(ii) स्मृतिहितवरदा
II. (i) संस्कृतभाषायाः ध्वनिश्रवणेन सुखं वर्धते।
(ii) संस्कृतभाषायाः एषा संस्कृतिः अस्ति।
III. (i) (स) संस्कृतिः
(ii) (ब) सरसा
(iii) (द) मतिः।

85. नवरस-रुचिरालङ्कृति-धारा
वेदविषय-वेदान्त-विचारा।
वैद्य-व्योम-शास्त्रादि-विहारा
विजयते धरायां, सुन्दरसुरभाषा ॥
I. एकपदेन उत्तरत –
(i) कति रुचिराः रसाः सन्ति?
(ii) संस्कृतभाषा कुत्र विजयते?
II. पूर्णवाक्येन उत्तरत –

(i) केषां विचाराः जनान् अभिप्रेरयन्ति?

(ii) कतरया भाषया चिकित्साविज्ञानं खगोलशास्त्रं च पृथिव्यां विहरति?

III. निर्देशानुसार उत्तरत –

(i) 'सुन्दरसुरभाषा' इति कर्तृपदस्य क्रियापदं किम् अस्ति?

(अ) धरायां (ब) विजयते (स) विहारा (द) विचारा

(ii) 'रसाः' इति पदस्य विशेषणपदं किम् अस्ति?

(अ) अलङ्कृतिः (ब) धारा (स) विचाराः (द) नव

(iii) 'अन्तरिक्षशास्त्रम्' इत्यर्थे पद्यांशे किं पदम् अस्ति?

(अ) व्योमशास्त्रम् (ब) वैद्यशास्त्रम् (स) वेदशास्त्रम् (द) काव्यशास्त्रम्

**उत्तर :** I. (i) नवरसाः।

(ii) धरायाम्।

II. (i) वेद-वेदान्तादीनां विचाराः जनान् अभिप्रेरयन्ति।

(ii) संस्कृतभाषाया चिकित्साविज्ञान-खगोलशास्त्रादिभिः सह पृथिव्यां विहरति।

III. (i) (ब) विजयते

(ii) (द) नव

(iii) (अ) व्योमशास्त्रम्।

86. मुनिवरविकसितकविवरविलसित –
मञ्जुलमञ्जूषा, सुन्दरसुरभाषा।
अयि मातस्तव पोषणक्षमता
मम वचनातीता, सुन्दरसुरभाषा ॥

I. एकपदेन उत्तरत –

(i) संस्कृतभाषा कैः विकसिता?

(ii) कविवर-विलसिता का अस्ति?

II. पूर्णवाक्येन उत्तरत –

(i) मञ्जुल-मञ्जूषा का अस्ति?

(ii) का मम वचनातीता अस्ति?

III. निर्देशानुसारम उत्तरत –

(i) 'तव' इति पदस्य विलोमपदं पद्यांशे किमस्ति?

(अ) अहम् (ब) मम (स) त्वम् (द) अयि

(ii) 'पेटिका' इत्यर्थे पद्यांशे किं पदं प्रयुक्तम्?

(अ) मञ्जुला (ब) विकसिता (स) क्षमता (द) मञ्जूषा

(iii) 'तव' इति सर्वनामपदस्थाने संज्ञापदं किम् अस्ति ?

(अ) संस्कृतभाषायाः (ब) कवेः (स) मञ्जूषायाः (द) सुरस्य

**उत्तर :** I. (i) मुनिवरैः

(ii) संस्कृतभाषा

II. (i) मञ्जुल-मञ्जूषा सुन्दरसुरभाषा अस्ति।

(ii) संस्कृतभाषायाः पोषणक्षमता वचनातीता अस्ति।

III. (i) (ब) मम

(ii) (द) मञ्जूषा

(iii) (अ) संस्कृतभाषायाः

87. वेदव्यास-वाल्मीकि-मुनीनां
कालिदास-बाणादिकवीनाम्।
पौराणिक-सामान्य-जनानां
जीवनस्य आशा, सुन्दरसुरभाषा ॥

I. एकपदेन उत्तरत –

(i) रामायणस्य रचयिता कः?

(ii) महाभारतस्य रचयिता कः?

II. पूर्णवाक्येन उत्तरत –

(i) केषां कवीनां जीवनस्य आशा संस्कृतभाषा अस्ति?

(ii) पौराणिक-सामान्य-जनानां जीवनस्य आशा का?

III. निर्देशानुसारम् उत्तरत –

(i) 'निराशा' इति पदस्य पद्यांशे विलोमपदं किम् अस्ति ?

(अ) आशा (ब) सुन्दरा (स) सामान्या (द) जीवनम्

(ii) 'देवभाषा' इत्यर्थे पद्यांशे किं पदं प्रयुक्तम्?

(अ) सुन्दरभाषा (ब) जनभाषा (स) सुरभाषा (द) जीवनभाषा

(iii) 'कवीनाम्' इति पदे का विभक्तिः?

(अ) तृतीया (ब) षष्ठी (स) पञ्चमी (द) सप्तमी

**उत्तर :** I. (i) वाल्मीकिः

(ii) वेदव्यासः

II. (i) कालिदास-बाणादिकवीनां जीवनस्य आशा संस्कृतभाषा अस्ति।

(ii) पौराणिक-सामान्य-जनानां जीवनस्य आशा संस्कृतभाषा अस्ति।

III. (i) (अ) आशा

(ii) (स) सुरभाषा

(iii) (ब) षष्ठी

----- -----